COLLEGE OF Fort William

18

Printed by Harimohan Mookerjea. 12, Fukeer Chand Mitter's Street, Calcutta.

TO

W. S. ATKINSON ESQR. M.A.

THIS BOOK IS DEDICATED

IN ACKNOWLEDGEMENT OF THE INTEREST
SHEWN BY HIM IN THE ADVANCE-
MENT OF BOTH ANCIENT AND
MODERN LEANING IN BENGAL,
AND IN TOKEN OF THE
ESTEEM, ADMIRATION
AND AFFECTION,

OF HIS FRIEND

TARANATHA TARKAVACHASPATI

ADVERTISEMENT

To the First Edition.

THE Siddhánta Kaumudí of Bhattoji Díkshita has a been considered the ablest practical adaptation of Páni great but difficult work. The edition published in Calcutt in the year 1811 has been long out of print, and a new edition was felt to be a great desideratum by all those interested in the thorough study of Sanskrit Grammar, whether in India or Europe. Under these circumstances I was very anxious that such an edition should be prepared, and the liberal subscription of Government for 200 copies enabled me to find a publisher willing to undertake the risk. The task of editing was undertaken by Pandit Tárá Nátha Tarkaváchaspati, the professor of Grammar in the Sanskrit College of Calcutta, and one of the profoundest grammarians of Bengal. He has given extracts from the three native Commentaries, the Manoramá, S'abdendus'ekhara and Tattwabodhin'i, and has also added a supplementary commentary of his 1, called the Saralá. The old edition merely contained text of the work; but the present annotations will be nd of the greatest use to elucidate the many obscurities, ch could not fail to occur in a book on such an abstruse ect.

EDW

इति काव्यप्रकाशनिर्घण्टसमाप्तिः ॥

॥ काव्यप्रकाशः ॥

॥ श्रीगणेशायनमः ॥

ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवतां ग्रन्थकृत् परामृशति ॥ नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्रां। नवरसरुचिरां निर्म्मितिमादधतीभारती कवेर्ज्जयति ॥

नियतिशक्त्या नियतरूपा सुखदुःखमोहस्वभावापरमाण्वाद्युपादानकर्म्मादिसहकारिकारणपरतन्त्रा षड्रसा न च हृद्यैवतैस्तादृशी ब्रह्मणोनिर्म्मितिर्निर्म्माणं एतद्विलक्षणा तु कविवाङ्निर्म्मितिः। अतएव जयति जयत्यर्थेन च नमस्कार आक्षिप्यत इति तां प्रत्यस्मि प्रणत इति लभ्यते इहाभिधेयं सप्रयोजनमित्याह॥

काव्यं यशसे ऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥

कालिदासादीनामिव यशः श्रीहर्षादेर्द्धावकादीना मिवधनं । राजादिगतोचिताचारपरिज्ञानं ॥ आदित्यादेर्म्मयूरादीनामिवानर्थनिवारणं॥ सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दं प्रभुसम्मितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्सम्मितार्थतात्पर्य्यवत्पुराणादीतिहासेभ्यश्च शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत्काव्यं लोकोत्तरवर्णनानिपुणकविकर्म्म तत् कान्तेव सरसतापादनेनाभिमुखीकृत्य रामादिवद्वर्त्तितव्यं न रावणादिवदित्युपदेशञ्च यथा योगं कवेः सहृदयस्य च करोतीति सर्व्वथा तत्र यतनीयं॥

अस्य कारणमाह॥ शक्ति र्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्। काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे॥ शक्तिः कवित्वबीजरूपः संस्कारविशेषः। यां विना काव्यं न प्रसरेत् प्रसृतम्वोपहसनीयं स्यात् लोकस्य स्थावरजङ्गमात्मलोकवृत्तस्य शास्त्राणां छन्दोव्याकरणाभिधानकोषकलाचतुर्व्वर्गगजतुरगखड्गादिलक्षणग्रन्थानां काव्यानाञ्च महाकविस

म्बन्धिनां आदिग्रहणादितिहासादीनाञ्च विमर्श नाद्युत्पत्तिः काव्यं कर्त्तुं विचारयितुञ्च ये जानन्ति तदुपदेशेन करणे योजने च पौनःपुन्येन प्रवृत्ति रिति त्रयः समुदिता नतु व्यस्तास्तस्य काव्यस्यो द्भवे निर्म्माणे समुल्लासेच हेतु र्नतुहेतवः। एवमस्य कारणमुक्का स्वरूपमाह ॥

तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनःक्वापि ॥

दोषगुणालङ्कारावच्यन्ते क्वापीत्यनेनैतदाह यत्स र्व्वत्र सालङ्कारौक्वचित्तु स्फुटालङ्कारविरहेपि नकाव्यत्वहानिः यथा ॥

यःकौमारहरःसएव हि वरस्ताएव चैत्रक्षपास्ते चोम्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः। साचैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते ॥

अत्र स्फुटोन कश्चिदलङ्कारः रसस्यच प्राधान्या न्नालङ्कारता तद्भेदान् क्रमेणाह। इदमुत्तममति शयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः कथितः॥ इदमिति काव्यं बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्य व्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः ॥

ततस्तन्मतानुसारिभिरन्यैरपि न्यग्भावितवाच्यव्यङ्ग्य
व्यञ्जनक्षमस्य शब्दार्थयुगलस्य यथा ॥

निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो नेत्रे दूर मनञ्जने पुलकिता तन्वी तवेयं तनुः । मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे वापीं स्नातुमितो गतासि न पुन स्तस्याधमस्यान्तिकं ॥

अत्र तदन्तिकमेव रन्तुं गतासीति प्राधान्येना धमपदेन व्यज्यते ॥ अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्येतु मध्यमं ॥ अतादृशि वाच्यादनतिशयिनि यथा ॥

ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरं । पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया ॥

अत्र वञ्जुललतागृहे दत्तसङ्केता नागतेति व्यङ्ग्यं गुणीभूतं तदपेक्षया वाच्यस्यैव चमत्कारित्वात् ॥ शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतं ॥ चित्रमिति गुणालङ्कारयुक्तं अव्यङ्ग्यमिति स्फुट प्रतीयमानार्थरहितं अवरमधमं यथा ॥

स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा मू र्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय वः । भिद्यादुद्य

दुद्दारदर्दुरदरीदैर्घ्यादरिद्रद्रुमद्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनीमन्दतां ॥ विनिर्गतं मानदमात्ममन्दिराद्भवत्युप श्रुत्ययदृच्छयापि यं । ससम्भ्रमेन्द्रद्रुतपातितार्गला निमी लिताक्षीव भियामरावती ॥ ० ॥

इति काव्यप्रकाशे काव्यस्य प्रयोजनकारणस्वरू पविशेषनिर्णयोनाम प्रथम उल्लासः ॥ ० ॥

क्रमेण शब्दार्थयोः स्वरूपमाह ॥ स्याद्वाच कोलाक्षणिकः शब्दोत्र व्यञ्जकस्त्रिधा ॥ अत्रेति काव्ये एषां स्वरूपं वक्ष्यते ॥ वाच्यादयस्तदर्थाः स्युर्वाच्यलक्ष्य व्यङ्ग्याः । तात्पर्य्यार्थोऽपि केषु चित् ॥ आकाङ्क्षासन्निधियोग्यतावशाद्वक्ष्यमाणस्वरूपाणां पदार्थानां समन्वये तात्पर्य्यार्थो विशेषवपुरपदा र्थोपि वाक्यार्थः समुल्लसतीत्यभिहितान्वयवादि नाम्मतं ॥ वाच्यएव वाक्यार्थइत्यन्विताभिधान वादिनः ॥ सर्व्वेषां प्रायशोर्थानां व्यञ्जकत्वमपी ष्यते । तत्र वाच्यस्य यथा ॥

माए घरोवअरणं अज्ज हि ण त्थित्ति साहिअं तु मए । ता भण किङ्करणिज्जं एमेअ ण वासरो ठाइ ॥

अत्र स्वैरविहारार्थिनीति व्यज्यतेलक्ष्यं यथा ॥

साहेन्ती सहिसुहअं खणे खणे दूणिआसि मज्झकए ॥
सब्भावणेह करणिज्ज सरिसं दावविरइअ न्तुमए ॥

अत्र मत्प्रियं रमयन्त्या त्वया शत्रुत्वमाचरितमिति लक्ष्यं॥ तेन च कामुकविषयं सापराधत्वप्रकाशनं व्यङ्ग्यं ॥ व्यङ्ग्यस्य यथा॥

उअ णिच्चलनिप्पन्दा भिसिनी पत्तम्मिरेहइ वलाआ ।
णिम्मलमरगअ भाअण परिट्ठिआ सङ्खसुत्तिवव ॥

अत्र निस्पन्दत्वेनाश्वस्तत्वं तेन च जनरहितत्वं अतः सङ्केतस्थानमेतदिति कयाचित् कञ्चित्प्रत्युच्यते । अथवा मिथ्यावदसि न त्वमत्रागतोभूरिति व्यज्यते॥ वाचकादीनां क्रमेण स्वरूपमाह। साक्षात्सङ्केतितं योर्थमभिधत्ते स वाचकः॥ इहागृहीतसङ्केतस्य शब्दस्यार्थप्रतीतेरभावात् सङ्केतसहाय एव शब्दोऽर्थविशेषं प्रतिपादयतीति यस्य यत्राव्यवधानेन सङ्केतोगृह्यते स तस्य वाचकः। सङ्केतितस्तुर्भेदोजात्यादिर्जातिरेव वा॥ यद्यप्यर्थक्रियाकारितया प्रवृत्तिनिवृत्तियोग्या व्यक्तिरेव तथाप्यानन्त्याद्व्यभिचाराच्च तत्र सङ्केतः कर्त्तुं न युज्यत इति॥ गौः शुक्लश्चलोडित्थइत्यादीनां विषयविभा

गोन प्राप्नोतीति च तदुपाधावेव सङ्केतः ॥ उपाधिश्च द्विविधः वस्तुधर्म्मोवक्तृयदृच्छया सन्निवेशितश्च। वस्तुधर्म्मोपि द्विविधः सिद्धः साध्यश्च सिद्धोपि द्विविधः पदार्थस्य प्राणप्रदोविशेषाधानहेतुश्च ॥ तत्राद्योजातिः उक्तंहि वाक्यपदीये गौःस्वरूपेण न गौर्नाप्यगौः गोत्वाभिसम्बन्धात्तु गौरिति ॥ द्वितीयो गुणः शुक्लादिना हि लब्धसत्ताकं वस्तु विशिष्यते साध्यः पूर्व्वापरीभूतावयवः क्रियारूपः। डित्थादि शब्दानामन्त्यबुद्धिनिर्ग्राह्यं संहृतक्रमस्वरूपं वक्त्रा यदृच्छया डित्थादिष्वर्थेषूपाधित्वेन सन्निवेश्यतइति सोऽयं संज्ञारूपोयदृच्छात्मकइति ॥ गौः शुक्लश्चलोडित्थइत्यादौ चतुष्टयी शब्दानां प्रवृत्तिरिति महाभाष्य कारः। परमाण्वादीनान्तु गुण मध्यपाठात् पारिभाषिकं गुणत्वं॥ गुणक्रियायदृच्छानां वस्तुतएकरूपाणामप्याश्रयभेदाद्भेदइव लक्ष्यते यथैकस्य मुखस्य खड्गमुकुरतैलाद्यालम्बन भेदात् हिमपयःशङ्खाद्याश्रयेषु परमार्थतोभिन्नेषु शुक्लादिषु यद्वशेन शुक्लः शुक्लइत्याद्यभिन्नाभि धानप्रत्ययोत्पत्तिस्तत् शुक्लत्वादिसामान्यं गुडत

गडुबादिपाकादिष्वेवमेव पाकादित्वं वालवृद्धशुकाद्युदीरितेषु डित्यादिशब्देषु च प्रतिक्षणं भिद्यमानेषु डित्याद्यर्थेषु वा डित्यादित्वमस्तीति सर्व्वेषां शब्दानां जातिरेव प्रवृत्तिनिमित्तमित्यन्ये ॥ तद्वानपोहोवाशब्दार्थः कैश्चिदुक्तइति ग्रन्थगौरवभयात् प्रकृतानुपयोगाच्च न दर्शितं ॥ समुख्योऽर्थस्तत्र मुख्योव्यापारोस्याभिधोच्यते ॥ सइति साक्षात्सङ्केतितः अस्येति शब्दस्य ॥ मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् । अन्योर्थोलक्ष्यते यत्सा लक्षणारोपिता क्रिया ॥ कर्म्मणि कुशलइत्यादौ दर्भग्रहणाद्ययोगात् गङ्गायां घोषइत्यादौ च गङ्गादीनां घोषाद्याधारासम्भवात् मुख्यस्यार्थस्य बाधे विवेचकत्वादौ सामीप्येच सम्बन्धे रूढितः प्रसिद्धेः॥ तथा गङ्गातटे घोषइत्यादेः प्रयोगात् येषां न तथा प्रतिपत्तिस्तेषां पावनत्वादीनां धर्म्माणां तथा प्रतिपादनात्मनः प्रयोजनाच्च मुख्येनामुख्योर्थोलक्ष्यते यत्स आरोपितः शब्दव्यापारः सान्तरार्थनिष्ठोलक्षणा ॥ स्वसिद्धये पराक्षेपः परार्थस्वसमर्पणं । उपादानं लक्षणञ्चेत्युक्ता शुद्धैव सा द्विधा ॥ कुन्ताः प्रवि

शक्तियष्टयः प्रविशन्ति इत्यादौ कुन्तादिभिरात्मनः प्रवेशसिद्ध्यर्थं स्वसंयोगिनः पुरुषा आक्षिप्यन्ते तदुपादानेनेयं लक्षणा॥ गौरनुबन्ध्य इत्यादौ श्रुतिसम्चोदितमनुबन्धनं कथं मे स्यादिति जात्या व्यक्तिराक्षिप्यते नतु शब्देनोच्यते विशेष्यं नाभिधागच्छेत् क्षीणशक्तिर्विशेषण इति न्यायादित्युपादानलक्षणा तु नोदाहर्त्तव्या नह्यत्र प्रयोजनमस्ति नवा रूढिरियं व्यक्त्यविनाभावित्वात्तु जात्या व्यक्तिराक्षिप्यते यथा क्रियतामित्यत्र कर्त्ता कुर्व्वित्यत्र कर्म्म प्रविश पिण्डमित्यादौ गृहं भक्षयेत्यादि च॥ पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र च रात्रिभोजनं लक्ष्यते श्रुतार्थापत्तेरर्थापत्तेर्व्वा तस्य विषयत्वात्। गङ्गायां घोष इत्यत्र तटस्य घोषाधिकरणत्वसिद्धये गङ्गा शब्दः स्वार्थमर्पयति इत्येवमादौ लक्षणे नैषा लक्षणा उभयरूपा चेयं शुद्धा उपचारेणामिश्रितत्वात्। अनयोर्लक्ष्यस्य लक्षकस्य च न भेदरूपं ताटस्थ्यं तटादीनां गङ्गादिशब्दैः प्रतिपादने तत्त्वप्रतिपत्तौ हि प्रतिपिपादयिषितप्रयोजन संप्र

त्ययः। गङ्गासम्बन्धमात्रप्रतीतौ गङ्गातटे घोष इति मुख्यशब्दाभिधानाल्लक्षणायाः कोभेदः॥ सारोपान्यातु यत्रोक्तौ विषयी विषयस्तथा। आरोप्यमाण आरोपविषयश्च यत्रानपह्नुतभेदौ सामानाधिकरण्येन निर्दिश्येते सा लक्षणासारोपा॥ विषय्यन्तःकृतेऽन्यस्मिन् सास्यात्साध्यवसानिका। विषयिणारोप्यमाणेनान्तःकृते निगीर्णेऽन्यस्मिन्नारोपविषये सति साध्यवसाना॥ भेदाविमौ च सादृश्यात्सम्बन्धान्तरतस्तथा॥ गौणौ शुद्धौ च विज्ञेयौ इमावारोपाध्यवसानरूपौ सादृश्यहेतू भेदौ। गौर्वाहीकइत्यत्र गौरयमित्यत्र च अत्र हि स्वार्थसहचारिणोगुणा जाड्यमान्द्यादयोलक्ष्यमाणा अपि गोशब्दस्य परार्थाभिधाने प्रवृत्तिनिमित्तत्वमुपयान्तीति केचित्॥ स्वार्थसहचारिगुणाभेदेन परार्थगतागुणा एव लक्ष्यन्ते नतु परार्थोऽभिधीयतइत्यन्ये। साधारणगुणाश्रयत्वेन परार्थएव लक्ष्यत इत्यपरे॥ उक्तञ्चान्यत्र॥ अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते। लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणतेति॥ अविनाभावोऽत्र

सम्बन्धमात्रं नतु नान्तरीयकत्वं ॥ तथात्वे हि मञ्चाः क्रोशन्तीत्यादौ न लक्षणा स्यात् अविनाभावे चाक्षेपेणैव सिद्धेर्लक्षणायानोपयोग इत्युक्तं॥ आयुर्घृतमायुरेवेदमित्यादौ च सादृश्यात् अन्यत् कार्य्यकारणभावादिसम्बन्धान्तरं ॥ एवमादौ च कार्य्यकारणभावादिलक्षणपूर्व्वआरोपाध्यवसाने॥ अत्र गौणभेदयोर्भेदेपि ताद्रूप्यप्रतीतिः॥ सर्व्वथैवाभेदावगमश्च प्रयोजनं॥ शुद्धभेदयोस्त्वन्यवैलक्षण्येनाव्यभिचारेणच कार्य्यकारित्वादि। क्वचित्तादर्थ्यादुपचारः यथेन्द्रार्था स्थूणा इन्द्रः क्वचित् स्वस्वामिभावात् यथा राजकीयः पुरुषोराजा क्वचिदवयवावयविभावात् यथाग्रहस्तइत्यत्राग्रमात्रेऽवयवे हस्तः॥ क्वचित् तात्कर्म्यात् यथा अतक्षा तक्षा लक्षणा तेन षड्विधा॥ आद्यभेदाभ्यां सह सा च व्यङ्ग्येन रहिता रूढौ सहिता तु प्रयोजने। प्रयोजनं हि व्यञ्जनव्यापारगम्यमेव ॥ तच्च गूढमगूढम्वा॥ तत्रेति व्यङ्ग्यं गूढं यथा॥

मुखं विकसितस्मितं वशितवक्रिमप्रेक्षितं समुच्छलितवि

भ्रमा गतिरपास्तसंस्थामतिः। उरोमुकुलितस्तनं जघनमंस बन्धोद्धुरं बतेन्दुवदना तनौ तरुणि मोद्गमोमोदते ॥

अगूढं यथा ॥

श्रीपरिचयाज्जडा अपि भवन्त्यभिज्ञा विदग्धचरितानां। उपदिशति कामिनीनां यौवनमद एव ललितानि ॥

अत्रोपदिशतीति अनायासेन शिक्षादानमभिधेयवत् स्फुटं प्रतीयते। तदेषा कथिता त्रिधा अव्यङ्ग्यागढव्यङ्ग्याअगूढव्यङ्ग्या च ॥ तद्भूलाक्षणिकः शब्द इति सम्बध्यते तद्भूस्तदाश्रयः॥ तत्र व्यापारो व्यञ्जनात्मकः॥ कुत इत्याह यस्य प्रतीतिमाधातुं लक्षणासमुपास्यते ॥ फले शब्दैकगम्ये त्र व्यञ्जना न्नापराक्रिया॥ प्रयोजन प्रतिपिपादयिषया यत्र लक्षणया शब्दप्रयोगस्तत्र नान्यतस्तत्प्रतिपत्तिरपितुतस्मादेव शब्दात् नचात्र व्यञ्जनादृतेऽन्यो व्यापारः॥ तथाहि नाभिधासमयाभावात्। गङ्गायां घोष इत्यादौ ये पावनत्वादयोधर्म्मास्तटादौ प्रतीयन्ते न तत्र गङ्गादिशब्दाः सङ्केतिताः॥ हेत्वभावान्न लक्षणा मुख्यार्थबाधादित्रयं हेतुः ॥ तथाच लक्ष्यं न मुख्यं नाप्यत्र बाधायोगः फलेन नो ॥

न प्रयोजनमेतस्मिन्नच शब्दः स्खलद्गतिः ॥ यथा गङ्गाशब्दः स्रोतसि सबाधइति तटं लक्षयति तद्वद्यदि तटेपि स बाधःस्यात् तत्प्रयोजनं लक्षयेत् नच तटं मुख्योऽर्थः नाप्यत्र बाधः नच गङ्गाशब्दार्थस्य तटस्य पावनत्वाद्यैर्लक्षणीयैः सम्बन्धः नापि प्रयोजने लक्ष्ये किञ्चित्प्रयोजनं नापि गङ्गाशब्दस्तटमिव प्रयोजनं प्रतिपादयितुं समर्थः ॥ एवमप्यननवस्थास्याद्या मूलक्षतिकारिणी। एवमपीति। प्रयोजनञ्चेल्लक्ष्यते तत्प्रयोजनान्तरेण तदपि प्रयोजनान्तरेणेति प्रकृता प्रतीतिकृदनवस्था भवेत्॥ ननु पावनत्वादिधर्म्मयुक्तमेव तटं लक्ष्यते गङ्गायास्तटे घोषइत्यतोऽधिकस्यार्थस्य प्रतिपत्तिश्च प्रयोजनमिति विशिष्टे लक्षणा तत्किं व्यञ्जनेनेत्याह प्रयोजनेन सहितं लक्षणीयं न युज्यते ॥ कुत इत्याह ज्ञानस्य विषयोह्यन्यः फलमन्यदुदाहृतं॥ प्रत्यक्षादेर्नीलादिर्विषयः फलन्तु प्रकटता सम्विर्त्तिर्व्वा ॥ विशिष्टे लक्षणा नैवं व्याख्यातं ॥ विशेषाः स्युस्तु लक्षिते ॥ तटादौये विशेषाः पावनत्वादयस्ते चाभिधातात्पर्य्यलक्षणाभ्योव्यापारान्तरेणगम्याः ।

तच्च व्यञ्जनध्वननादिशब्दवाच्यमवश्यमेषितव्यं एवं लक्षणामूलं व्यञ्जकत्वमुक्तं ॥ अभिधामूलं त्वाह अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते। संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनं ॥ संयोगो विप्रयोगश्च साहचर्यं विरोधिता। अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः। सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः। शब्दार्थस्यानवच्छेदे विशेषस्मृति हेतवः ॥ इत्युक्तदिशा ॥

सशङ्खचक्रो हरिः अशङ्खचक्रो हरिरित्युच्यते। रामलक्ष्मणाविति दाशरथौ। रामार्ज्जुनगतिस्तयोरिति भार्गवकार्त्तवीर्य्ययोः। स्थाणुम्भज भवच्छिदइति हरे। सर्व्वं जानाति देव इति युष्मदर्थे। कुपितो मकरध्वज इति कामे। देवस्य पुरारातेरिति शम्भौ। मधुना मत्तःकोकिल इति वसन्ते। पातु वो दयितामुखमिति सांमुख्ये। भात्यत्र परमेश्वरइति राजधानीरूपात् देशाद्राजनि। चित्रभानुर्विभातीति दिने। रवौ रात्रौ वह्नौ। मित्रम्भातीति सुहृदि। मित्रो भातीति रवौ। इन्द्रशत्रुरित्यादौ वेद एव काव्येन स्वरो विशेषप्रतीतिकृत् आदिग्रहणात्। एद्दहमेत्तत्थणिआ एद्दहमेत्तेहिं अच्छिवत्तेहिं॥ एद्दहमेत्तावत्था एद्दहमेत्तेहिं दिअ एहिं॥

इत्यादावभिनयादयः। इत्थं संयोगादिभिरर्था न्तराभिधायकत्वे निवारितेप्यनेकार्थस्य शब्दस्य यत् क्वचिदर्थान्तरप्रतिपादनन्तत्र नाभिधा निय मनात्तस्या न च लक्षणा मुख्यार्थबाधाद्यभावात् अपितु अञ्जनं व्यञ्जनमेव व्यापारः यथा ॥

भद्रात्मनो दुरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुख संग्रहस्य। यस्यानुपप्लुतगतेः परवारणस्य दानाम्बुसेकसुभगः सततं करोभूत् ॥

तद्युक्तो व्यञ्जकः शब्दः तद्युक्तो व्यञ्जनाव्याप रयुक्तः। यत्सोऽर्थान्तरयुक् तथा। अर्थोपि व्यञ्जक स्तत्र सहकारितया मतः ॥ तथेति व्यञ्जकः ॥

इति श्रीकाव्यप्रकाशे शब्दनिर्णयोनाम द्वितीय उल्लासः ॥ ० ॥

अर्थाः प्रोक्ताः पुरा तेषां ॥ अर्था वाच्यलक्ष्य व्यङ्ग्याः ॥ तेषां वाचकलाक्षणिकव्यञ्जकानां अर्थ व्यञ्जकतोच्यते। कीदृशीत्याह। वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः । प्रस्तावदेशकालादेर्वैशि ष्ट्यात् प्रतिभाजुषां। योऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा । बोद्धव्यः प्रतिपाद्यः। काकुर्ध्वनेर्वि

कारः। प्रस्तावः प्रकरणं अर्थस्य वाच्यलक्ष्यव्यङ्ग्या त्मनः॥ क्रमेणोदाहरणं॥

अइ विउलं जलकुम्भं घेत्तूण समागदह्मि सहि तुरिअं। समसेअसलिलणीसासणीसहा वीसमामीखणं॥

अत्र चौर्य्यरत गोपनं गम्यते॥

ओणिद्दं दोब्बल्लं चिन्ता अलसत्तणं सणीससिअं। मह मन्दभाइणीए केरं सहि तुह वि परिहवइ॥

अत्र दूत्यास्तत्कामुकोपभोगोव्यज्यते॥

तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां वने व्याधैः सार्द्धं सुचिरमुषितं वल्कलधरैः। विराटस्यावासे स्थितमनुचितारम्भनिभृतं गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु॥

अत्र मयि न योग्यः खेदः कुरुषु तु योग्य इति काक्वा प्रकाश्यते॥ नच वाच्यसिद्ध्यङ्गमत्र काकुरिति गुणीभूतव्यङ्ग्यत्वं शङ्क्यं प्रश्नमात्रेणापि काकोर्विश्रान्तेः॥

तइआ महगण्डत्थलमिलिदं दिट्ठिं णेसि अण्णत्तो। एह्निंसच्चेअअहं तेअ कवोला णसादिट्ठी॥

अत्र मत्सखीं कपोलप्रतिविम्बितां पश्यतस्ते दृष्टिरन्यैवाभूत् चलितायान्तु तस्यामन्यैव जाते त्यहो प्रच्छन्नकामुकत्वमिति व्यज्यते ॥

उद्देशोऽयं सरसकदलीश्रेणिशोभातिशायी कुञ्जोत्कर्षाङ्कुरितरमणीविभ्रमो नर्मदायाः । किञ्चैतस्मिन् सुरतसुहृदस्तन्वि ते वान्ति वाता येषामग्रे सरति कलिताकाण्डकोपो मनोभूः ॥

अत्र रतार्थं प्रविशेति व्यङ्ग्यं ॥

णोल्लेइ अणलमणा अत्ता मं घरभरम्मि सअलम्मि ।
खण मेत्तं जइ संझाइ होइ ण व होइ वीसामो ॥

अत्र सन्ध्यासङ्केतकालइति तटस्थं प्रति कयाचिद्द्योत्यते ॥

सुव्वइ समागमिस्सदि तुज्झ पिओ अज्ज पहरमेत्तेण ।
एमेअ कित्ति चिट्ठसि ता सहि सज्जेसु करणिज्जं ॥

अत्रोपपतिं प्रत्यभिसर्तुं प्रस्तुतं न युक्तमिति कयाचिन्निवार्य्यते ॥

अन्यत्र यूयं कुसुमावचायं कुरुध्वमत्रास्मि करोमि सख्यः । नाहं हि दूरं भ्रमितुं समर्था प्रसीदतायं रचितोऽञ्जलिर्व्वः ॥

अत्र विविक्तोऽयं देश इति प्रच्छन्नकामुकस्त्वयाभिसार्य्यतामिति आश्वस्तां प्रति कयाचिन्निवेद्यते ॥

गुरु अण परवसपिअ किं भणामि तुह मन्दभाइणी कवु अहं । अज्ज प्पवासं वच्चसि वच्च सअं ज्जेअ मूणसि करणिज्जं ॥

अत्राद्यमधुसमये यदि व्रजसि तदाहन्तावन्न भवामि तव तु न जानामि गतिमिति व्यज्यते ॥ आदिग्रहणाच्चेष्टादेः तत्र चेष्टाया यथा ॥

द्वारोपान्तनिरन्तरे मयि तया सौन्दर्य्यसारश्रिया प्रोल्लासोरुयुगं परस्परसमासक्तं समासादितं । आनीतं पुरतः शिरोंऽशुकमधःक्षिप्ते चले लोचने वाचस्तच्च निवारितं प्रसरणं सङ्कोचिते दोर्लते ॥

अत्र चेष्टया प्रच्छन्नकान्तविषयआकूतविशेषोध्वन्यते ॥ निराकाङ्क्षप्रतिपत्तये प्राप्तावसरतया पुनःपुनरुदाह्रियते वक्त्रादीनां मिथःसंयोगोद्विकादिभेदेन अनेन क्रमेण लक्ष्यव्यङ्ग्ययोश्च व्यञ्जकत्वमुदाहार्य्यं । शब्दप्रमाणवेद्योऽर्थोव्यनक्त्यर्थान्तरं यतः । अर्थस्य व्यञ्जकत्वे तच्छब्दस्य सहकारिता ॥ शब्देति नहि प्रमाणान्तरवेद्योऽर्थो व्यञ्जकः ॥

इति श्रीकाव्यप्रकाशेऽर्थनिर्णयस्तृतीयउल्लासः॥०॥

यद्यपि शब्दार्थयोर्न्निर्णये कृते दोषगुणालङ्काराणां स्वरूपमभिधानीयं तथापि धर्म्मिणि प्रदर्शिते धर्म्माणां हेयोपादेयता ज्ञायत इति प्रथमं काव्यभेदानाह॥ अविवक्षितवाच्योयस्तत्र वाच्यं भवेद्ध्वनौ। अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतं॥ लक्षणामूलगूढव्यङ्ग्यप्राधान्ये सत्येव अविवक्षितं वाच्यं यत्र सध्वनावित्यनुवादात् ध्वनिरिति ज्ञेयं तत्र च वाच्यं क्वचिदनुपयुज्यमानत्वादर्थान्तरे परिणमितं यथा॥

त्वामस्मि वच्मि विदुषां समवायोत्र तिष्ठति। आत्मीयां मतिमादाय स्थितिमत्र विधेहि तत्॥

अत्र वचनाद्युपदेशादिरूपतया परिणमति। क्वचिदनुपपद्यमानतयाऽत्यन्तं तिरस्कृतं यथा॥

उपकृतं बहु यत्र किमुच्यते सुजनता प्रथिता भवतापरं। विदधदीदृशमेव सदा सखे सुखितमास्स ततः शरदां शतं॥

एतदपकारिणं प्रति विपरीतलक्षणया कश्चिद्वक्ति॥ विवक्षितञ्चान्यपरं वाच्यं यत्रापरस्तु सः॥ अन्यपरं व्यङ्ग्यनिष्ठं एष च। कोप्यलक्ष्यक्रमव्यङ्ग्यो लक्ष्यव्यङ्ग्यक्रमः परः॥ अलक्ष्येति न खलु विभावा

नुभावव्यभिचारिण एव रसः अपितु रसस्तैरित्यस्ति क्रमः सतु लाघवान्न लक्ष्यते। तत्र। रसभावतदाभासभावशान्त्यादिरक्रमः। भिन्नोरसाद्यलङ्कारादलङ्कार्य्यतया स्थितः॥ आदिग्रहणाद्भावोदयभावसन्धिभावशबलत्वानि ॥ प्रधानतया यत्र स्थितोरसादिस्तत्रालङ्कार्य्यः यथोदाहरिष्यते। अन्यत्र तु प्रधाने वाक्यार्थे यत्राङ्गभूतोरसादिस्तत्र गुणीभूतव्यङ्ग्ये रसवत्प्रेय ऊर्ज्जस्विसमाहितादयोऽलङ्काराः॥ ते च गुणीभूतव्यङ्ग्याभिधाने उदाहरिष्यन्ते॥ तत्र रसस्वरूपमाह॥ कारणान्यथकार्य्याणि सहकारीणि यानि च। रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः॥ विभावा अनुभावाश्च कथ्यन्ते व्यभिचारिणः। व्यक्तः स तैर्विभावाद्यैः स्थायी भावोरसः स्मृतः॥ उक्तंहि भरतेन। विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति॥ एतद्विवृणुते विभावैर्ललनोद्यानादिभिरालम्बनोद्दीपनकारणैः। स्थायीरत्यादिकोभावोजनितः अनुभावैः कटाक्षभुजाक्षेपप्रभृतिभिः कार्य्यैः प्रतीतियोग्यः कृतः व्यभिचारिभिर्निर्वेदादिभिः सहकारिभिरुपचितो मुख्यया वृत्त्या रामादावनुकार्य्ये तद्रूपतानुसन्धा

नान्नर्त्तकेपि प्रतीयमानोरसइति भट्टलोल्लटप्रभृतयः ॥ राम एवायमयमेव राम इति न रामोयमित्युत्तरकालिके बाधे रामोयमिति रामः स्याद्वानवायमिति रामसदृशोयमिति च सम्यङ्मिथ्या संशयसादृश्यप्रतीतिभ्योविलक्षणया चित्रतुरगादिन्यायेन रामोयमिति प्रतिपत्त्या ग्राह्ये नटे ॥

सेयं ममाङ्गेषु सुधारसच्छटा सुपूरकर्पूरशलाकिका दृशोः । मनोरथश्रीर्मनसःशरीरिणी प्राणेश्वरी लोचनगोचरङ्गता ॥ दैवादहमद्य तया चपलायतनेत्रया वियुक्तश्च । अविरलविलोलजलदः कालः समुपागतश्चायं ॥

इत्यादिकाव्यानुसन्धानबलाच्छिक्षाभ्यासनिर्वर्त्तितस्वकार्य्यप्रकटनेन च नटेनैव प्रकाशितैः कारणकार्य्यसहकारिभिः कृत्रिमैरपि तथानभिमन्यमानैर्विभावादिशब्दव्यपदेश्यैः संयोगाद्गम्यगमकभावादनुमीयमानोपि वस्तुसौन्दर्य्यबलाद्रसनीयत्वेनान्यानुमीयमानविलक्षणः स्थायित्वेन सम्भाव्यमानोरत्यादिर्भावस्तत्रासन्नपि सामाजिकानां वासनया चर्व्यमाणोरसइति श्री शङ्कुकः ॥ न ताटस्थ्येन नात्मगतत्वेन रसः प्रतीयते नोत्पद्यते नाभिव्यज्यते अपितु काव्ये नाट्येचाभिधातोद्वितीयेन

विभावादिसाधारणीकरणात्मना भावकत्वव्यापारेण भाव्यमानः स्थायी सत्त्वोद्रेकप्रकाशानन्दमयसम्विद्विश्रान्तिसतत्त्वेन भोगेन भुज्यतइति भट्टनायकः। लोके प्रमदादिभिः स्थाय्यनुमानेऽभ्यासपाटववतां काव्ये नाट्येच तैरेव कारणत्वादिपरिहारेण विभावनादिव्यापारवत्त्वादलौकिकविभावादिशब्दव्यवहार्य्यैर्म्ममैवैते शत्रोरेवैते तटस्थस्यैवैते न ममैवैते न शत्रोरेवैते न तटस्थस्यैवैते इतिसम्बन्धविशेषस्वीकारपरिहारनियमानध्यवसायात् साधारण्येन प्रतीतैरभिव्यक्तः सामाजिकानां वासनात्मतया स्थितः स्थायी रत्यादिकोनियतप्रमातृगतत्वेन स्थितोपि साधारणोपायबलात् तत्कालविगलितपरिमित प्रमातृभाववशोन्मिषितवेद्यान्तरसम्पर्कशून्यापरिमितभावेन प्रमात्रा सकलसहृदयसम्वादभाजा साधारण्येन स्वाकारइवाभिन्नोपि गोचरीकृतश्चर्व्यमाणतैकप्राणोविभावादिजीवितावधिः पानकरसन्यायेन चर्व्यमाणः पुरइव परिस्फुरन् हृदयमिव प्रविशन् सर्व्वाङ्गीनमिवालिङ्गन् अन्यत् सर्व्वमिव तिरोदधत् ब्रह्मास्वादमिवानुभावयन् अलौकिकचमत्कारकारी शृङ्गारादिको

रसः। सच न कार्य्यः विभावादिविनाशेपि तस्य सम्भवप्रसङ्गात्। नापि ज्ञाप्यः सिद्धस्य तस्याभावात् अपितु विभावादिभिर्व्यञ्जितश्चर्व्वणीयः कारकज्ञापकाभ्यामन्यत् क्व दृष्टमिति चेत् न क्वचिद्दृष्टमित्यलौकिकसिद्धेर्भूषणमेतन्न दूषणं। चर्व्वणानिष्पत्त्या तस्य निष्पत्तिरुपचरितेति कार्य्योप्युच्यतां लौकिकप्रत्यक्षादिप्रमाणताटस्थ्यावबोधशालिमितयोगिज्ञानवेद्यसंस्पर्शरहितस्वात्ममात्रपर्य्यवसितपरिमितेतरयोगिसंवेदनविलक्षणलोकोत्तरस्वसंवेदनगोचरइति प्रत्ययोऽप्यधीयतां। तद्ग्राहकञ्च न निर्व्विकल्पकं विभावादिपरामर्शप्रधानत्वात्। नापि सविकल्पकं चर्व्यमाणस्यालौकिकानन्दमयस्य स्वसम्वेदनसिद्धत्वात् उभयाभावस्वरूपस्य चोभयात्मकत्वमपि पूर्व्ववल्लोकोत्तरतामेव गमयति नतु विरोधमिति श्रीमदाचार्य्याभिनवगुप्तपादाः॥ व्याघ्रादयो विभावा भयानकस्येव वीराद्भुतरौद्राणां। अश्रुपातादयोनुभावाः शृङ्गारस्येव करुणभयानकयोश्चिन्तादयोव्यभिचारिणः शृङ्गारस्येव वीरकरुणभयानकानामिति पृथगनैकान्तिकत्वात् सूत्रे मिलिता निर्द्दिष्टाः॥

वियदलिमलिनाम्बुगर्भमेघं मधुकरकोकिलकूजितैर्दिशां श्रीः। धरणिरभिनवाङ्कुराङ्कटङ्का प्रणतिपरे दयिते प्रसीद मुग्धे॥ इत्यादौ॥ परिमृदितमृणालीम्लानमङ्गं प्रवृत्तिः कथमपि परिवारप्रार्थनाभिः क्रियासु। कलयति च हिमांशोर्निष्कलङ्कस्य लक्ष्मीमभिनवकरिदन्तच्छेदकान्तः कपोलः॥ ॥इत्यादौ॥ दूरादुत्सुकमागते विवलितं सम्भाषिणि स्फारितं संश्लिष्यत्यरुणं गृहीतवसने किञ्चाञ्चितभ्रूलतं। मानिन्याश्चरणानतिव्यतिकरे वास्पाम्बुपूर्णेक्षणं चक्षुर्जातमहोप्रपञ्चचतुरं जातागसि प्रेयसि। इत्यादौ॥

यद्यपि विभावानामनुभावानामौत्सुक्यव्रीडाहर्षकोपासूयाप्रसादानाञ्च व्यभिचारिणां केवलानामत्र स्थितिस्तथाप्येतेषामसाधारणत्वमित्यन्यतमद्वयाक्षेपकत्वे सति नानैकान्तिकत्वमिति॥ तद्विशेषानाह ॥ शृङ्गारहास्यकरुणरौद्रवीरभयानकाः। वीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्येरसाः स्मृताः॥ तत्र शृङ्गारस्य द्वौ भेदौ सम्भोगोविप्रलम्भश्च॥ तत्राद्यं परस्परावलोकनालिङ्गनाधरपानपरिचुम्बनाद्यनन्तभेदत्वादपरिच्छेद्य एक एव गण्यते यथा॥

शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनैर्निद्रा व्याजमुपागतस्य सुचिरं निर्व्वर्ण्य पत्युर्म्मुखं। विश्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता॥ तथा। त्वं मुग्धाक्षि विनैव कञ्चुलिकया धत्से मनोहारिणीं लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिका संस्पृशि। शय्योपान्तनिविष्टसस्मितसखीनेत्रोत्सवानन्दितो निर्यातः शनकैरलीकवचनोपन्यासमालीजनः।

अपरस्त्वभिलाषविरहेर्ष्याप्रवासशापहेतुक इति पञ्चविधः क्रमेणोदाहरणं॥

प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदयास्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्म्मयि। यास्वन्तःकरणस्य बाह्यकरणव्यापाररोधी क्षणादाशंसापरिकल्पितास्वपि भवत्यानन्दसान्द्रो लयः॥ अन्यत्र व्रजतीति का खलु कथा नाप्यस्य तादृक्सुहृद्यो मां नेच्छति नागतश्च हहहा कोयं विधेः प्रक्रमः। इत्यल्पेतरकल्पनाकवलितस्वान्ता निशान्तान्तरे बाला वृत्तविवर्त्तनव्यतिकरा नाप्नोति निद्रां निशि॥ एषा विरहोत्कण्ठिता॥ सा पत्युः प्रथमापराधसमये सख्योपदेशं विना नो जानाति सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनं। स्वच्छैरच्छकपोलमूलगलितैः पर्य्यस्तनेत्रोत्पला बाला केवलमेव रोदिति लुठल्लोलालकैरश्रुभिः॥ प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं

गतं धृत्या नचणमासितं व्यवसितं चित्तेन गन्तुं पुरः। यातुं निश्चितचेतसि प्रियतमे सर्व्वे समं प्रस्थिता गन्तव्ये सति जीवित प्रियसुहृत्सार्थः किमु त्यज्यते ॥ त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायामात्मानन्ते चरणपतितं यावदिच्छामि कर्त्तुं। अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः॥

हास्यादीनां क्रमेणोदाहरणं॥

आकुञ्च्य पाणिमशुचिं मम मूर्ह्निं वेश्या मन्त्राम्भसां प्रतिपदं पृषतैः पवित्रे। तारस्वरं प्रहितथूत्कमदात्प्रहारं हाहा हतो हमिति रोदिति विष्णुशर्म्मा ॥ हा मातस्त्वरितासि कुत्र किमिदं हा देवताः क्वाशिषोधिक्प्राणान् पतितोशनिर्हुतव हस्तेङ्गेषुदग्धे दृशौ । इत्थंघर्घरमध्यरुद्धकरुणाः पौराङ्ग नानां गिरश्चित्रस्थानपि रोदयन्ति शतधा कुर्व्वन्ति भित्ती रपि॥ कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं मनुजपशुभि र्निर्मर्य्यादैर्भवद्भिरुदायुधैः। नरकरिपुणा सार्द्धं तेषां सभीम किरीटिनामयमहमसृङ्मेदोमांसैः करोमि दिशांबलिं॥ चुद्राः संत्रासमेते विजहत हरयः चुण्णशक्रेभकुम्भा युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतन्तः। सौमित्रे तिष्ठ पात्रं त्वमसि नहि रुषां नन्वहं मेघनादः किञ्चिद्भ्रूभङ्गलीलानिय मितजलधिं राममन्वेषयामि॥ ग्रीवाभङ्गाभिरामं मुहुरनुप

तति स्यन्दने दत्तदृष्टिः पश्चार्द्धेन प्रविष्टः शरपतनभयाद्भूयसापूर्व्वकायं। शष्पैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा पश्यादग्रप्लुतत्वात् वियति वहुतरं स्तोकमुर्व्व्यां प्रयाति॥ उत्कृत्योत्कृत्य कृत्तिं प्रथममथपृथूत्सेधभूयांसि मांसान्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा। आन्तः पर्य्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्कादङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति॥ चित्रं महानेष तवावतारः क्व कान्तिरेषाभिनवैवभङ्गिः। लोकोत्तरं धैर्य्यमहोप्रभावः काप्याकृतिर्नूतनएष सर्गः॥

एषां स्थायिभावानाह ॥ रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयन्तथा। जुगुप्सा विस्मयश्चैव स्थायिभावाः प्रकीर्त्तिताः । स्पष्टं व्यभिचारिणोब्रूते॥ निर्व्वेदग्लानिशङ्काख्यास्तथासूयामदश्रमाः। आलस्यञ्चैव दैन्यञ्च चिन्तामोहः स्मृतिर्धृतिः। व्रीडा चपलताहर्ष आवेगोजडता तथा। गर्व्वोविषाद औत्सुक्यं निद्रापस्मार एव च। त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः। त्रयस्त्रिंशदमीभावाः समाख्यातास्तु नामतः ॥ निर्व्वेदस्यामङ्गलप्रायस्य प्रथममनुपादेयत्वेप्युपादानं व्यभिचारित्वेपि स्थायिता

भिधानार्थं ॥ तेन निर्व्वेदस्थायिभावोस्तिशान्तोपि नवमोरसः । यथा ॥

अहौ वा हारेवा कुसुमशयने वा दृषदि वा मणौ वा लोष्टेवा बलवति रिपौ वा सुहृदि वा । तृणे वा स्त्रैणे वा मम समदृशोयान्तु दिवसाः कदा पुण्येरण्ये शिव शिव शिवेति प्रलपतः ॥

रतिर्देवादिविषया व्यभिचारी तथाञ्जितः । भाव प्रोक्तः ॥ आदिशब्दान्मुनिगुरुनृपपुत्रादिविषया ॥ कान्ताविषया तु व्यक्ता शृङ्गारः । उदाहरणं ॥

कण्ठकोणविनिविष्टमीशते कालकूटमपि मे महामृतं । अप्युपात्तममृतं भवद्वपुर्भेदवृत्ति यदि मे न रोचते ॥ हरत्य घं संप्रति हेतुरेष्यतः शुभस्य पूर्व्वाचरितैः कृतं शुभैः । शरीर भाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेपि योग्यतां ॥

पुत्रविषया रतिर्यथा ॥

एह्येहि वत्स रघुनन्दन पूर्णचन्द्र चुम्बामि मूर्द्धनि चिरञ्च परिष्वजे त्वां । आरोप्य वा हृदि दिवानिशमुद्वहामि वन्दे थवा चरणपुष्करकद्वयन्ते ॥

एवमन्यदप्युदाहार्य्यं ॥ व्यभिचारी यथा ॥

जाने कोपपराङ्मुखी प्रियतमा स्वप्नेद्य दृष्टा मया मा मां संस्पृश पाणिनेति रुदती गन्तुं प्रवृत्ता ततः । नो यावत्प

रिरुद्य चाटुकशतैराश्वासयामि प्रियां भ्रातस्तावदहं शठेन विधिना निद्रादरिद्रीकृतः ॥

अत्र विधिं प्रत्यसूया । तदाभासा अनौचित्यप्रवर्त्तिताः । तदाभासा रसाभासाभावाभासाश्च । तत्र रसाभासो यथा ॥

स्तुमः कं वामाक्षि क्षणमपि विना यं न रमसे विलेभे कः प्राणान् रणमुखमुखे यं मृगयसे । सुलग्ने को जातः शशिमुखि यमालिङ्गसि बलात्तपःश्रीः कस्यैषा मदननगरि ध्यायसि तु यं ॥

अत्रानेककामुकविषयमभिलाषं तस्याः स्तुम इत्याद्यनुचितं वक्तृव्यापारोपादानं व्यनक्ति ॥

भावाभासो यथा ॥

राकासुधाकरमुखी तरलायताक्षी सस्मेरयौवनतरङ्गितविभ्रमास्या । तत् किं करोमि कथमत्र तनोमि मैत्रीं तत्स्वीकृतिव्यतिकरे क इहाभ्युपायः ॥

अत्र चिन्ता अनौचित्यप्रवर्त्तिता एवमन्येष्वुदाहार्य्याः ॥ भावस्य शान्तिरुदयः सन्धिः शवलता तथा । क्रमेणोदाहरणं ॥

तस्याः सान्द्रविलेपनस्तनयुगप्रश्लेषमुद्राङ्कितं किम्वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्यते । इत्युक्ते क तदित्युदीर्य्य

सहसा तल्संप्रमार्ष्टुं मया साश्लिष्टा रभसेन तत्सुखवशात्त
त्व्यापि तद्विस्मृतं ॥ अत्र कोपस्य ॥ एकस्मिन् शयने विपक्षरम
णीनामग्रहे मुग्धया सद्यःकोपपराङ्मुखं शयितया चाटूनि
कुर्व्वन्नपि। आवेगादवधीरितः प्रियतमस्तूष्णींस्थितस्तत्क्षणा
न्माभूत्सुप्त इवेत्यमन्दवलितग्रीवं पुनर्वीक्षितः॥ अत्रौत्सुक्यस्य॥
उत्सिक्तस्य तपःपराक्रमनिधेरभ्यागमादेकतः सत्सङ्गप्रियता
च वीररभसोत्फालस्य मां कर्षतः। वैदेहीपरिरम्भ एष च
मुहुश्चैतन्यमामीलयन्नानन्दीहरिचन्दनेन्दुशिशिरः स्निग्धो
रुणद्ध्यन्यतः॥ अत्रावेगहर्षयोः॥ क्वाकार्य्यं शशलक्ष्मणः क्व च
कुलं भूयोपि दृश्येत सा दोषाणां प्रशमाय मे श्रुतमहो
कोपेपि कान्तं मुखं। किम्वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेपि
सा दुर्लभा चेतः स्वास्थ्यमुपेहि कः खलु युवा धन्योधरं
धास्यति॥

अत्र वितर्कौत्सुक्यमतिस्मरणशङ्कादैन्यधृतिचि
न्तानां भावस्थितिस्तूक्ता चोदाहृता च ॥ मुख्येर
सेपि तेङ्गित्वं प्राप्नुवन्ति कदाचन॥ ते भावशान्त्या
दयः अङ्गित्वं राजानुगतविवाहप्रवृत्तभृत्यवत्॥
अनुस्वानाभसंलक्ष्य क्रमव्यङ्ग्यस्थितिस्तु यः। शब्दा
र्थोभयशक्त्युत्थस्त्रिधा स कथितोध्वनिः॥ शब्दशक्ति
मूलानुरणनरूपव्यङ्ग्यः॥ अर्थशक्तिमूलानुरणन

रूपव्यङ्ग्यः। उभयशक्तिमूलानुरणनरूपव्यङ्ग्यश्चेति त्रिविधः॥ अलङ्कारोथ वस्त्वेव शब्दाद्यत्रावभासते॥ प्रधानत्वेन स ज्ञेयः शब्दशक्त्युद्भवोद्विधा॥ वस्त्वेवेति अनलङ्कारोवस्तुमात्रं। आद्योयथा॥

उल्लास्य कालकरवालमहाम्बुवाहं देवेन येन जरठोर्ज्जितगर्ज्जितेन। निर्व्वापितः सकल एव रणे रिपूणां धाराजलैस्त्रिजगति ज्वलितः प्रतापः॥

अत्र वाक्यस्यासम्बद्धत्वस्याभिधायकत्वं माप्रसाङ्क्षीदित्यत्र प्राकरणिकाप्राकरणिकयोरुपमानोपमेयभावः कल्पनीयइत्यत्रोपमालङ्कारोव्यङ्ग्यः॥

तिग्मरुचिरप्रतापोविधुरनिशाकृद्विभो मधुरलीलः। मतिमानतत्त्ववृत्तिः प्रतिपदपक्षाग्रणीर्व्विभाति भवान्॥

अत्रैकस्य पदस्य द्विपदत्वे विरोधाभासः॥

अमितः समितः प्राप्तैरुत्कर्षैर्हर्षदः प्रभो। अहितः सहितः साधुयशोभिरसतामसि॥

अत्रापि विरोधाभासः॥

निरुपादानसम्भारमभित्तावेव तन्वते। जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने॥

अत्र व्यतिरेकः अलङ्कार्य्यस्यापि ब्राह्मणश्रमणन्यायेनालङ्कारता॥ वस्तुमात्रं यथा॥

पथिअ ण एत्थ पत्थरमत्थि मणं पत्थरत्थले गामे। उख
अपओ हरूपेक्खिरण जइ वससिरंता वसस ॥

अत्र यद्युपभोगक्षमोसि तदास्वेति व्यज्यते ॥

शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि नरेन्द्र यस्मै त्वं।
यस्मै प्रसीदसि पुनः स भात्युदारोनुदारश्च ॥

अत्र विरुद्धावपि त्वदनुवर्त्तनार्थमेकं कार्य्यं कुरुत इति ध्वन्यते ॥ अर्थशक्त्युद्भवोप्यर्थोव्यञ्जकः सम्भवी स्वतः। प्रौढोक्तिमात्रात्सिद्धोवा कवेस्तेनोम्भितस्य वा। वस्तुवालङ्कृतिर्वेति षड्भेदोसौ व्यनक्ति यत्। वस्त्वलङ्कारमथ वा तेनायं द्वादशात्मकः ॥ अर्थोद्विविधः स्वतःसम्भवी इदंप्रथमकल्पितश्च तत्र स्वतः सम्भवी न केवलं भणितिमात्रनिष्पन्नो यावद्बहिरप्यौचित्येन सम्भाव्यमानः कविनाप्रतिभामात्रेण वहिरसन्नपि निर्म्मितः। कविनिबद्धेन वा वक्त्रेति द्विविधोऽपरइति त्रिविधः॥ वस्तुवालङ्कारो वासाविति षोढा व्यञ्जकः ॥ तस्य वस्तुवालङ्कारो वाव्यङ्ग्यइति द्वादशभेदोऽर्थशक्त्युद्भवोध्वनिः। क्रमेणोदाहरणं ॥

अलससिरोमणिधुत्ताणं अग्गिमोपुत्तिधणसमिद्धिमओ ॥
इअभणिएणणअङ्गीपफुल्ल विलोअणाजाआ ॥

अत्र ममैवोपभोग्यइति वस्तुना वस्तु व्यज्यते ॥

धन्यासि या कथयसि प्रियसङ्गमेपि विस्रब्धचाटुकशतानि रतान्तरेषु । नीवीं प्रतिप्रणिहिते तु करे प्रियेण सख्यः शपामि यदि किञ्चिदपि स्मरामि ॥

अत्र त्वमधन्या अहन्तुधन्येति व्यतिरेकालङ्कारः ॥

दर्पान्धगन्धगजकुम्भकपाटकूटसंक्रान्तनिघ्नघनशोणितशोणशोचिः । वीरैर्व्यलोकि युधि कोपकषायकान्तिः कालीकटाक्षइव यस्य करे कृपाणः ॥

अत्रोपमालङ्कारेण सकलरिपुबलक्षयः क्षणात्करिष्यतइति वस्तु ॥

गाढकान्तदशनक्षतव्यथासङ्कटादरिवधूजनस्य यः । ओष्ठविद्रुमदलान्यमोचयन्निर्दशन् युधि रुषा निजाधरं ॥

अत्र विरोधालङ्कारेणाधरनिर्दशनसमकालमेव शत्रवोव्यापादिता इति तुल्ययोगिता ॥ मम क्षत्याप्यन्यस्य क्षतिर्निवर्त्ततामिति तद्बुद्धिरुत्प्रेक्ष्यते इत्युत्प्रेक्षा वा ॥ एषूदाहरणेषु स्वतःसम्भवी व्यञ्जकः ॥

कैलासस्य प्रथमशिखरे वेणुसंमूर्छनाभिः श्रुत्वा कीर्त्तिं विबुधरमणीगीयमानां यदीयां। स्रस्तापाङ्गाः सरसबिसिनीकाण्डसञ्जातशङ्कादिग्मातङ्गाः श्रवणपुलिने हस्तमावर्त्तयन्ति ॥

अत्र वस्तुना येषामप्यर्थाधिगमो नास्ति तेषामप्येवमादिबुद्धिजननेन चमत्कारं करोति त्वत्कीर्त्तिरिति वस्तु ध्वन्यते॥

केसेसु बला मोडिअ तेण समरम्मिजअसिरीगहिआ।
जह कन्दराहिं विहुरातस्स दिढंकंठम्मिसंठविआ ॥

अत्र केशग्रहणावलोकनोद्दीपितमदना इव कन्दरास्तद्विधुरान्कण्ठे गृह्णन्ति इत्युत्प्रेक्षा एकत्र संग्रामे विजयदर्शनात्तस्यारयः पलाय्य गुहासु तिष्ठन्तीति काव्यहेतुरलङ्कारः ॥ न पलाय्य गतास्तद्वैरिणोपितु ततः पराभवं संभाव्य तान् कन्दरा नत्यजन्तीत्यपह्नुतिश्च ॥

गाढालिङ्गणरहस्स जअम्मिदद्दएलहुसमोसरद्द। माणंसिणीणंमाणोपीलणभीअघहिअआहि ॥

अत्रोत्प्रेक्षया प्रत्यालिङ्गनादि तत्र जृम्भत इति।

आठेरंवहसन्नीकइवअणंवुरुहबद्धविणिवेसा। दावेइभुअण मण्डलमसंविअजअइसावाणी ॥

अत्रोत्प्रेक्षया चमत्कारैककारणं ॥

नवंनवंजगदजडाननस्यानिर्मिमीतइति व्यतिरेकः ॥

एषु कविप्रौढोक्तिमात्रनिष्पन्नः ॥

जे लंकागिरिमेहलाहिं खलिदा सम्भोअखिणोरईफारो प्फुल्लफणावलीकवलणे पत्तादरिद्दत्तणं। ते एहिंमलआनिलाविरहिणीणीसाससम्पक्किणो जादाझत्तसिसुत्तणे विवहला तारुणपुणाविअ ॥

अत्र निःश्वासैः प्राप्तैश्वर्य्यावायवः किंकिं न कुर्व्वन्तीति वस्तुना वस्तु व्यज्यते ॥

सहिषिविरहकणमाणसस्तमंज्जंधीरक्तत्तणेण। आसासान्पिअदंसणविहलंखलणखणंम्मिमह सन्ति ते णओसरिअं ॥

अत्र वस्तुनाऽक्ततेपि प्रार्थने प्रसन्नेति विभावना। प्रियदर्शनस्य सौभाग्यवलं धैर्य्येण सोढुं न शक्यते इत्युत्प्रेक्षावेति ॥

उल्लोलकरअरलोअणखएहिंतुहअणेसुंमहदिसं। रत्तंसुअंपसाओ कोवेण पुणोइमे ण अक्कमिआ ॥

अत्र किमिति लोचनैकुपिते वहसीत्युत्तरालंकारेण न केवलमार्द्रनखक्षतानि गोपयसि यावत्तेषामहं प्रसादपात्रं जातेति वस्तु ॥

महिलासहस्सभरिए तुह हिअए सुहअ सा अमाअन्ती।
अणुदिणमणणकम्मा अङ्गं तणुअम्पि तणुएइ ॥

अत्र हेत्वलङ्कारेण तनोस्तनूकरणेपि तव हृदये न वर्त्तते इति विशेषोक्तिः। एषु कविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नशरीरो व्यञ्जकः॥ एवं द्वादश भेदाः॥ शब्दार्थोभयभूरेकः। यथा॥

अतंद्रचन्द्राभरणा समुद्दीपितमन्मथा। तारका तरला श्यामा सानन्दं न करोति कं॥

अत्रोपमाव्यङ्ग्या॥ भेदा अष्टादशास्य तत्॥ अस्येति ध्वनेः॥ ननु रसादीनां बहुत्वे कथमष्टादशेत्याह ॥ रसादीनामनन्तत्वाद्भेद एको हि गण्यते॥ तथाहि। नव रसाः। तत्र शृङ्गारस्य द्वौ भेदौ। सम्भोगो विप्रलम्भश्च। सम्भोगस्यापि परस्परदर्शनालिङ्गनपरिचुम्बनादिकुसुमोच्चयजलकेलिसूर्य्यास्तमयचन्द्रोदयषडृतुवर्णनादयो बहवो भेदाः॥ विप्रलम्भस्याभिलाषादय उक्ताः। तयोरपि विभावानुभावव्यभिचारिवैचित्र्यं। तत्रापि नायकयोरुत्तममध्यमाधमप्रकृतित्वं॥ तत्रापि देशकालावस्थाभेदा इत्येकस्यैव रसस्यानन्त्यं का गणना त्वन्येषां। असंलक्ष्यक्रमत्वन्तु सामान्यमाश्रित्य रसादिध्वनि

भेदएकएव गण्यते । वाक्येद्व्युत्थः । द्व्युत्थ इति शब्दार्थोभयशक्तिमूलः पदेप्यन्ये । अपि शब्दादाक्येपि । एकावयवस्थितेन भूषणेन कामिनीव पदद्योत्येन व्यङ्ग्येन वाक्यव्यङ्ग्या भारतीभासते । तत्र पदप्रकाश्यत्वे क्रमेणोदाहरणानि ॥

यस्य मित्राणि मित्राणि शत्रवः शत्रवस्तथा । अनुकम्प्यो ऽनुकम्प्यश्च स जातः स च जीवति ॥

अत्र द्वितीयमित्रादिशब्दा आश्वस्तत्वनियन्त्रणत्वस्नेहपात्रत्वादिसंक्रमितवाच्याः ॥

खलववहारा दीसन्ति दारुणाजहवितहविधीराणं । हिअअवअस्स बऊमआणऊववसाआविमुह्यन्ति ॥

अत्र विमुह्यन्तीति ॥

लावण्यं तदसौ कान्तिस्तद्रूपं स वचःक्रमः । तदा सुधास्पदमभूदधुनातु ज्वरोपमं ॥

अत्र तदादिपदैरनुभवैकगोचरा अर्थाः प्रकाश्यन्ते । यथावा ॥

मुग्धे मुग्धतयैव नेतुमखिलः कालः किमारभ्यते मानं धत्स्व धृतिंबधान ऋजुतां दूरे कुरु प्रेयसि । सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीतानना नीचैः शंसहृदिस्थितोहि ननु मे प्राणेश्वरः श्रोष्यति ॥

अत्र भीताननेति। एतेन हि नीचैः शंसनविधानस्य युक्तता गम्यते भावादीनां पदप्रकाश्यत्वेधिकं न वैचित्र्यमिति न तदुदाह्रियते॥

रुधिरविसरप्रसाधितकरवालकरालरुचिरभुजपरिघः।
झटिति भ्रुकुटिविटङ्कितललाटपट्टोविभाति नृपभीमः॥

अत्र भीषणीयस्य भीमसेन उपमानं॥

भुक्तिमुक्तिकृदेकान्तसमादेशनतत्परः। कस्य नानन्दनिस्यन्दं विदधाति सदागमः॥

काचित्संकेतदायिनमेवं मुख्यया वृत्त्या शंसति॥

सायं स्नानमुपासितं मलयजेनाङ्गं समालम्भितं यातोऽस्ताचलमौलिमम्बरमणिर्विस्रब्धमन्दा गतिः। आश्चर्यं तव सौकुमार्य्यमभितः क्लान्तासि येनाधुना नेत्रद्वन्द्वममीलनव्यतिकरं शक्नोति तेनासितुं॥

अत्र वस्तुना कृतपरपुरुषपरिचया क्लान्तासीति वस्त्वधुनापदद्योत्यं व्यज्यते॥

तदप्राप्तिमहादुःखविलीनाशेषपातका। तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया तथा॥ चिन्तयन्ती जगत्सूतिं परब्रह्मस्वरूपिणं। निरुच्छ्वासतया मुक्तिं गतान्या गोपकन्यका॥

अत्र जन्मसहस्रैरुपभोक्तव्यानि सुकृतदुष्कृतफलानि वियोगदुःखचिन्तनाह्लादाभ्यामनुभूतानी

त्युक्तं। एवञ्च अशेषचयपदद्योत्येऽतिशयोक्तौ॥

चणदासावचणदावनमवनं व्यसनमव्यसनं। वत वीरतव द्विषतां पराङ्मुखेत्वयि पराङ्मुखं सर्व्वं॥

अत्र शब्दशक्तिमूलविरोधाङ्गेनार्थान्तरन्यासेन विधिरपि त्वामनुवर्त्तत इति सर्व्वपदद्योत्यं वस्तु॥

तुहवल्लहस्सगोसम्मिआसि अहरोमिलाणकमलदलो। इअ णव वहूआसोऊणकुणइवअणंमही समुहं॥

अत्र रूपकेण त्वयास्य मुहुर्म्मुहुः परिचुम्बनं कृतं येन म्लानत्वमिति म्लानादिपदद्योत्यं काव्यलिङ्गं। एषु स्वतःसम्भवो व्यञ्जकः॥

राईसुचन्दधवलासुललिअमाफालिऊणजोचावं। एकछत्तं विअकुणइभुवणरज्जं विअम्भन्तो॥

अत्र वस्तुना येषां कामिनामसौ राजा स्मरस्तेभ्योन कश्चिदपि तदाज्ञावशपराङ्मुख इति॥

जायद्भिरुपभोगपरैरेतैर्निशातिवाह्यते॥

इतिभुवनराज्यपदद्योत्यं वस्तु प्रकाश्यते॥

निशितशरधियाऽर्पयत्यनङ्गोदृशि सुदृशः स्ववलं वयस्यराले। दिशि निपतति यत्र सा च तत्र व्यतिकरमेत्य समुन्मिषन्त्यवस्थाः॥

अत्र वस्तुना युगपदवस्थाः परस्परविरुद्धा अपि भवन्तीति व्यतिकरपदद्योत्योविरोधः ॥

वारिज्जन्तोविउणोसंदावकअत्थिएणहिअ। एणथणहरव अस्सएणविसुद्धजाइणचलइमेहारो ॥

अत्र विशुद्धजातित्वलक्षणहेत्वलंकारेण हारो ऽनवरतं कम्पमान एवास्ते इति नचलतीति पद व्यङ्ग्यं वस्तु ॥

सोसुद्धसामलंगोधम्मिल्लोकलिअ ललिअणिअदेहो। ताएखं धाहिवलंहिअसरोसुरअसंगरेजअइ ॥

अत्र रूपकेण मुकुराकर्षणे तथा केशपाशः स्कन्धयोः प्राप्तोयथा रतिविरता वप्यनिवृत्ताभि लाषः कामुकोभूदिति स्कन्धपदद्योत्या विभावना। एषु कविप्रौढोक्तिमात्रनिष्पन्नशरीरः ॥

णवपुण्णिमामिअङ्कस्स सुहअ कोतंसिभणसुमहसच्चं। कासोहगासमग्गा पओसरअणिव्वतुहअज्ज ॥

अत्र वस्तुनामयीवास्यामपि प्रथममनुरक्तस्त्वं न नतइति नवेत्यादिपओसित्यादिपदद्योत्यं वस्तुव्यज्यते ॥

सहिणवणिडुवणसमरम्मिअंकवालीएसहीएणिविडाए। हारोणिवारिओ विअउच्चरअन्तोतदोकहं रमिअं ॥

अत्र वस्तुना हारच्छेदादनन्तरमन्यदेव रतम वश्यमभूत्तत्कथय कीदृगिति व्यतिरेकः काव्य पदगम्यः॥

पविसन्तीघरवारं विवलिअवअणा विलोइऊणपहं। खन्धे घेत्तूणघडं हा हा णट्ठोत्ति रुअसि सहि किन्ति॥

अत्र हेत्वलङ्कारेण संकेतस्थानं गच्छन्तं दृष्ट्वा यदि तत्र गन्तुं इच्छसि तदपरं घटं गृहीत्वा गच्छेति वस्तु किन्तिपदव्यंग्यं। यथा॥

विहलंखलंतुमं सहि दट्ठूण कुडेण तरलतरदिट्ठिं वारफ्फं समिसेण अप्पा गुरुओत्ति पाडिअविभिण्णो॥

अत्र नदीकूले लतागहने कृतसङ्केतमप्राप्त गृहप्रवेशावसरे पश्चादागतं दृष्ट्वा पुनर्नदीगम नाय द्वारघातव्याजेन बुद्धिपूर्वं व्याकुलया त्वया घटः स्फोटित इति मया चिन्तितं तत्किमिति नाश्व सिषि तत्समीहितसिद्धये व्रज अहं ते श्वश्रूनिकटे सर्वं समर्थयिष्ये इति द्वारस्पर्शनव्याजेनेत्यपह्नुत्या वस्तु॥

जोलाइ महुरसेण अविदणतारुण उस्सुअ मणा सा। बुड्ढाविणवोढव्वपरवहुअहहहरइ तुहहिअअं॥

अत्र काव्यलिङ्गेन वृद्धां परवधू त्वमस्मानुज्झित्वाभिलषसीति त्वदीयमाचरितं वक्तुं न शक्यमित्याक्षेपः परवधूपदप्रकाश्यः । एषु कविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नशरीरः। वाक्यप्रकाश्येतु पूर्व्वमुदाहृतं ॥ शब्दार्थोभयशक्त्युद्भववस्तु पदप्रकाश्योन भवतीति पञ्चत्रिंशद्भेदाः ॥ प्रबन्धेप्यर्थशक्तिभूः ॥ यथा गृध्रगोमायुसंवादादौ ॥ तथाच ॥

अलं स्थित्वा श्मशानेस्मिन् गृध्रगोमायुसंकुले। कंकालबहुले घोरे सर्व्वप्राणिभयङ्करे। नचेह जीवितः कश्चित् कालधर्म्ममुपागतः। प्रियोवा यदिवा द्वेष्यः प्राणिनां गतिरीदृशी ॥ इति दिवाप्रभवतोगृध्रस्य पुरुषविसर्जनपरमिदं वचनं ॥ आदित्योऽयं स्थितोमूढाः स्नेहं कुरुत सांप्रतं । बहुविघ्नोमुहूर्त्तोयं जीवेदपि कदाचन। अमुं कनकवर्णाभं बालमप्राप्तयौवनं । गृध्रवाक्यात्कथं मूढास्त्यजध्वमविशङ्किताः ।

इति निशिविजृम्भमाणस्य गोमायोर्जनव्यावर्त्तननिष्ठञ्चेति प्रबन्ध एव प्रथते। अन्येत्वेकादशभेदा ग्रन्थविस्तरभयान्नोदाहृताः स्वयन्तु लक्षणतोनुसर्त्तव्याः अपि शब्दात्पदवाक्ययोः पदैकदेशरचनावर्णेष्वपि रसादयः तत्र प्रकृत्या यथा ॥